# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -दिसम्बर, २०१८

| कक्षा -शास्त्रितृतीयवर्षम् (SEM-5) | प्रश्नपत्रम् – ८ | गुणाः - ७० |
|---|---|---|
| विषयः - वेदः | (C. E.- 3.5.10.) | |
| दिनाङ्कः - १२/१२/२०१८ | अर्थसंग्रहः | समयः -१०.०० तः ०१.०० |

**प्रथमान्वितिः**

**प्रश्नः १ अधोलिखितेषु द्वयोः प्रश्नयोः व्याख्यात्मकमुत्तरं लिखत।** **( १० )**

(क) पुरुषो प्रवृत्यनुकूलो भावयितुर्व्यापारविशेषः ।

(ख) अपौरुषेयं वाक्यं वेदः ।

(ग) कर्मस्वरूपमात्रबोधकोविधिः ।

**प्रश्नः २ अर्थसंग्रहानुसारम् आर्थीभावनां निरूपयत ।** **( १० )**

**अथवा**

**अर्थसंग्रहमनुश्रृत्य वेदलक्षणं विवेचयत ।**

**द्वितीयान्वितिः**

**प्रश्नः ३ अधोलिखितेषु द्वयोः व्याख्यात्मकमुत्तरं लिखत ।** **( १० )**

(१) एतस्य विधेः सहकारिभूतानि षट्प्रमाणानि-श्रुति-लिङ्ग-वाक्य-प्रकरण-स्थान-समाख्यारूपाणि ।

(२) आख्यातेन हि भावनोच्यते ।

(३) तदिदं लिङ्गं वाक्यादिभ्यो बलवत् ।

**प्रश्नः ४ एकपदश्रुतेः स्वरूपं यथाग्रन्थं निरूपयत ।** **( १० )**

**अथवा**

**विनियोगविधेः स्वरूपं प्रतिपादयत ।**

**तृतीयान्वितिः**

**प्रश्नः ५ अधोलिखितेषु द्वयोः प्रश्नयोः उत्तरं लिखत ।** **( १० )**

(१) यत्र प्रयोजनवशेन क्रमनिर्णयः सोऽर्थक्रमः ।

(२) कर्मजन्यफलस्वाम्यबोधको विधिः ।

(३) प्रयोगसमवेतार्थस्मारका मन्त्राः ।

**प्रश्नः ६ यथाशास्त्रं नियमविधिं निरूपयत ।** **( १० )**

**अथवा**

**स्थानलक्षणं विवेचयत ।**

**चतुर्थान्वितिः**

**प्रश्नः ७ अधोलिखितेषु केषाञ्चन दशप्रश्नानाम् अतिलघूत्तरं लिखत ।** **( १० )**

(१) पञ्चपञ्चनखा भक्ष्या – कस्योदाहरणं वर्तते ?

(२) श्रौती परिसंख्यायाः उदाहरणं किम् ?

(३) नियमविधेः उदाहरणं किम् ?

(४) राजसूययागस्य फलं किं श्रूयते ?

(५) अधिकारविधेः लक्षणं किम् ?

(६) मुख्यक्रमः प्रवृत्तिक्रमाद् बलवान् न वा ?

(७) ज्योतेष्टोमे कति पशुयागाः ?

(८) स्थानलक्षणं किम् ?

(९) पदार्थबोधकवाक्यानां यः क्रमः स कः ?

(१०) अर्थक्रमपाठ्यक्रमयोर्मध्ये कः बलवान् ?

(११) समाख्या कति विधाः ? का च ताः ?

(१२) पाठसादेश्यं कति विधम् ?

(१३) महाप्रकरणस्य लक्षणं किम् ?

(१४) किं नाम लिङ्गम् ?

(१५) श्रुतिः कति विधाः ? का च ताः ?

--००--